## अष्टादशः पाठः

# पुरुषोत्तमः

वाल्मीकिविरचितं रामायणं विश्वविश्रुतं महाकाव्यं वर्तते। तस्मात् गृहीतानि एतानि पद्यानि महाकाव्यनायकस्य रामस्य चरितम् अभिव्यञ्जयन्ति।



**इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।**
**नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥1॥**

**अन्वयः** – इक्ष्वाकुवंशप्रभवः नियतात्मा महावीर्यः द्युतिमान् धृतिमान् वशी रामः नाम जनैः श्रुतः।

**शब्दार्थः** – इक्ष्वाकुवंशप्रभवः – इक्ष्वाकु वंश में उत्पन्न, नियतात्मा – मन को वश में रखने वाले, द्युतिमान् – कान्तिमान्, धृतिमान् – धैर्यवान्, वशी – इन्द्रियों को वश में करने वाले।

**स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः।**
**समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ॥2॥**

**अन्वयः** – सर्वगुणोपेतः कौसल्यानन्दवर्धनः स गाम्भीर्ये समुद्र इव धैर्येण हिमवान् इव च (अस्ति)।

**शब्दार्थः** – सर्वगुणोपेतः – सम्पूर्ण गुणों से युक्त, कौसल्यानन्दवर्धनः – कौसल्या के आनन्द को बढ़ाने वाले, गाम्भीर्ये – गम्भीरता में, हिमवान् इव – हिमालय के समान।

**स जगाम वनं वीरः प्रतिज्ञामनुपालयन्।**
**पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात् ॥3॥**

**अन्वयः** – कैकेय्याः प्रियकारणात् पितुर्वचननिर्देशात् प्रतिज्ञामनुपालयन् सः वीरः वनं जगाम।

**शब्दार्थः** – कैकेय्याः प्रियकारणात् – कैकेयी को प्रिय लगने के कारण, पितुर्वचननिर्देशात् – पिता के वचनों के निर्देश से, प्रतिज्ञामनुपालयन् – प्रतिज्ञा का पालन करते हुए।

**तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह।**
**स्नेहाद् विनयसम्पन्नः सुमित्रानन्दवर्धनः ॥4॥**

**अन्वयः** – सुमित्रानन्दवर्धनः विनयसम्पन्नः प्रियः भ्राता लक्ष्मणः व्रजन्तं तम् (रामं) अनुजगाम ह।

**शब्दार्थः** – सुमित्रानन्दवर्धनः – सुमित्रा के आनन्द को बढ़ाने वाले, विनयसम्पन्नः – विनय से युक्त, अनुजगाम – अनुसरण किया।

**सीताप्यनुगता रामं शशिनं रोहिणी यथा।**
**पौरैरनुगतो दूरं पित्रा दशरथेन च ॥5॥**

**अन्वयः –** पित्रा दशरथेन पौरैः च दूरम् अनुगतः (रामः) सीता अपि रामम् अनुगता यथा रोहिणी शशिनम्।

**शब्दार्थः –** पौरैः – नगरवासियों के द्वारा, अनुगतः – अनुसरण किया

**चित्रकूटं गते रामे पुत्रशोकातुरस्तदा।**
**राजा दशरथः स्वर्गं जगाम विलपन् सुतम्॥6॥**

**अन्वयः –** तदा रामे चित्रकूटं गते पुत्रशोकातुरः तदा राजा दशरथः सुतं विलपन् स्वर्गं जगाम।

**शब्दार्थः –** गते – चले जाने पर, पुत्रशोकातुरः – पुत्र शोक से दुःखी, विलपन् – विलाप करते हुए।

**ततः शूर्पणखावाक्यादुद्युक्तान् सर्वराक्षसान्।**
**खरं त्रिशिरसं चैव दूषणं चैव राक्षसम्**
**निजघान रणे रामस्तेषां चैव पदानुगान्॥7॥**

**अन्वयः –** ततः शूर्पणखावाक्याद् उद्युक्तान् सर्वराक्षसान् खरं त्रिशिरसं दूषणं राक्षसम् तेषाम् एव पदानुगान् च (असुरान्) रामः रणे निजघान।

**शब्दार्थः –** उद्युक्तान् – तत्पर रहने वाले, सर्वराक्षसान् – सभी राक्षसों को, पदानुगान् – अनुगम करने वालों को

**वने तस्मिन् निवसता जनस्थाननिवासिनाम्।**
**रक्षसां निहतान्यासन् सहस्राणि चतुर्दश।**
**ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः॥8॥**

**अन्वयः –** तस्मिन् वने निवसता (रामेण) जनस्थाननिवासिनां रक्षसां चतुर्दश सहस्राणि निहतानि आसन्। ततः ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः (जातः)।

**शब्दार्थः –** निहतानि आसन् – मारे गए थे, ज्ञातिवधम् – जाति वालों के वध को।

**तेन मायाविना दूरमपवाह्य नृपात्मजौ।**
**जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम्॥9॥**

**अन्वयः –** सः रावणः मायाविना तेन (मारीचेन) नृपात्मजौ दूरम् अपवाह्य रामस्य भार्यां जहार, जटायुषं गृध्रं हत्वा (गतः)।

**शब्दार्थः –** अपवाह्य – ले जाकर, जहार – हरण किया, हत्वा – मारकर।

**पम्पातीरे हनुमता सङ्गतो वानरेण ह।**
**हनुमद्वचनाच्चैव सुग्रीवेण समागतः॥10॥**

**अन्वयः –** (ततः) पम्पातीरे हनुमता वानरेण (रामः) सङ्गतः, हनुमद् वचनात् एव सुग्रीवेण समागतः च।

**शब्दार्थः–** सङ्गतः – मेल हुआ, सुग्रीवेण समागतः – सुग्रीव से मित्रता हुई।

**ततः सुग्रीववचनाद्धत्वा वालिनमाहवे।**
**सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत्॥11॥**

**अन्वयः –** ततः राघवः सुग्रीववचनात् आहवे वालिनं हत्वा तद् राज्ये सुग्रीवम् एव प्रत्यपादयत्।

**शब्दार्थः –** सुग्रीववचनात् – सुग्रीव के वचन से, आहवे – युद्ध में, प्रत्यपादयत् – बैठा दिया

**ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम्।**
**रामाय प्रियमाख्यातुं पुनरायात्महाकपिः ॥12॥**

**अन्वयः** – ततः मैथिलीं सीताम् ऋते पुरीं लङ्कां दग्ध्वा महाकपिः रामाय प्रियम् आख्यातुं च पुनः आयात्।

**शब्दार्थः** – ततः – तब सम्पाती के वचन सुनकर समुद्र को लाँघकर लङ्का जाकर, ऋते – बिना

**सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम्।**
**न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥13॥**

**अन्वयः** – सः अमेयात्मा (हनुमान्) अभिगम्य महात्मानं रामम् प्रदक्षिणं कृत्वा तत्त्वतः न्यवेदयत् (यत्) मया सीता दृष्टा इति।

**शब्दार्थः** – अमेयात्मा – अपरिमित बुद्धिशाली, तत्वतः – यथार्थ रूप से, न्यवेदयत् – निवेदन किया

**तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे।**
**रामः सीतामनुप्राप्य परां व्रीडामुपागमत्॥14॥**

**अन्वयः** – तेन (सेतुना) पुरीं लङ्कां गत्वा आहवे रावणं हत्वा सीताम् अनुप्राप्य रामः परां व्रीडाम् उपागमत्।

**शब्दार्थः** – आहवे – युद्ध में, अनुप्राप्य – पाकर, व्रीडाम – लज्जा को

**नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः।**
**रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान्॥15॥**

**अन्वयः** – अनघः रामः नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितः सीताम् अनुप्राप्य राज्यं पुनः अवाप्तवान्।

**शब्दार्थः**– अनघः – निष्पाप, हित्वा – कटाकर।

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) नियतात्मा महावीर्यः कः ?

(ख) रामः किमर्थं वनं गतः ?

(ग) सुग्रीववचनात् रामः कं हतवान् ?

(घ) महाकपिः कां दग्धवान् ?

(ङ) सीता दृष्टा इति कः रामं न्यवेदयत् ?

### (2) एकवाक्येन उत्तरं लिखत –

(क) सीता लक्ष्मणश्च केन सह वनम् अगच्छताम् ?

(ख) रामः कस्मिन् वंशे उत्पन्नः अभूत् ?

(ग) केन दशरथस्य मरणमभवत्?

(घ) मायावी रावणः सीतां कथं जहार ?

(ङ) श्रीरामः वालिनः राज्ये कं प्रत्यपादयत् ?

## (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) रामस्य विशिष्टगुणाः के ?

(ख) रामस्य वनगमनसमये के दूरम् अनुगताः ?

(ग) वने रामः शूर्पणखावाक्यादुद्युक्तान् कान् निजघान ?

(घ) हनुमान् कं प्रियम् आख्यातुम् आयात् ?

(ङ) रावणस्य वधानन्तरं रामः किं कृतवान् ?

## (4) युग्ममेलनं कुरुत –

| | (अ) | (आ) |
|---|---|---|
| (क) | कौसल्यानन्दवर्धनः | हनुमान् कृतवान् |
| (ख) | पुत्रशोकेन | राक्षसान् हतवान् |
| (ग) | लङ्कादहनम् | रामायणं रचितवान् |
| (घ) | वने रामः | श्रीरामः |
| (ङ) | वाल्मीकिः | दशरथमरणम् |

## (5) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं 'न' इति लिखत –

| | | |
|---|---|---|
| **यथा –** | **श्रीरामः धैर्येण हिमवान् इव अस्ति** | **आम्** |
| | **सुग्रीवेण सह रामः मित्रतां न कृतवान्** | **न** |
| (क) | कैकेय्याः प्रियकारणात् रामः वनं गतः। | |
| (ख) | सुमित्रानन्दवर्धनः लक्ष्मणः वनं न गतः। | |
| (ग) | रामः चतुर्दशसहस्रराक्षसान् हतवान्। | |
| (घ) | सुग्रीवः वालिनं हतवान्। | |
| (ङ) | रामः रावणं न हतवान्। | |

## (6) उचितैः शब्दैः रिक्तस्थानानि पूरयत –

(क) रामः . . . . . . . . . . . . . . गाम्भीर्ये अस्ति। (समुद्र इव / नदी इव)

(ख) वनं गत्वा रामः . . . . . . . . . . . . . . निजघान। (वानरान् / राक्षसान्)

(ग) सुग्रीवेण सह . . . . . . . . . . . . . रामस्य मित्रता सम्पन्ना। (पम्पातीरे / नदीतीरे)

(घ) लङ्कां गत्वा रामः . . . . . . . . . . . . . . हतवान्। (विभीषणं / रावणं)

(ङ) रामः . . . . . . . . . . . . . . जटां त्यक्तवान्। (वन्दिग्रामे / नन्दिग्रामे)

## (7) अधोलिखितवाक्यानि भूतकाले परिवर्तयत –

(क) राक्षसान् मारणाय रामः वनं गच्छति।

(ख) रामेण सह सीता लक्ष्मणश्च वनं गच्छतः।

(ग) रामः सुग्रीवेण सह मैत्रीं करोति।

(घ) वाल्मीकिः रामचरितं लिखति।

(ङ) श्रीरामः विभीषणाय लङ्कराज्यं ददाति।

## (8) उदाहरणानुसारं शब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| **रामः** | **राम** | **प्रथमा** | **एकवचनम्** |
| वीरः | | | |
| खरम् | | | |
| भार्याम् | | | |
| धैर्येण | | | |
| स्वर्गे | | | |
| वचनेभ्यः | | | |
| भ्रातृभिः | | | |
| नन्दिग्रामे | | | |

## (9) अधोलिखितशब्दानां समानार्थशब्दान् लिखत –

**उदाहरणं यथा – सुतः – पुत्रः।**

रामः – . . . . . . . . . .

हनुमान् – . . . . . . . . . .

शशी – . . . . . . . . . .

राजा– . . . . . . . . . .

समुद्रः – . . . . . . . . . .

वनम् – . . . . . . . . . .

## ( 10 ) निम्नलिखित-अव्ययानि प्रयुज्य वाक्यनिर्माणं कुरुत -

**उदाहरणं यथा -**

**इव -** **रामस्य गम्भीरता समुद्रः इव अस्ति।**

च - . . . . . . . . . . . . . . . . . . . . . .।

ततः - . . . . . . . . . . . . . . . . . . . . . .।

अपि - . . . . . . . . . . . . . . . . . . . . . .।

एव - . . . . . . . . . . . . . . . . . . . . . .।

## ( 11 ) निम्नलिखितेषु धातुं प्रत्ययं च पृथक् कुरुत -

**उदाहरणं यथा -**

**दृष्ट्वा** **दृश् + क्त्वा।**

कृत्वा - . . . . . . . . . . . . . . . . . . . . . .।

श्रुत्वा - . . . . . . . . . . . . . . . . . . . . . .।

हत्वा - . . . . . . . . . . . . . . . . . . . . . .।

दग्ध्वा - . . . . . . . . . . . . . . . . . . . . . .।

## योग्यताविस्तारः -

- श्रीरामस्य विस्तृतं चरितम् अन्वेषयत पठत च।
- पाठे आगतान् श्लोकान् कण्ठस्थं कुरुत।

❖ ❖ ❖